चिन्ताखण्डनस्तोत्रम्

यया ते धर्मकामौ च यया ते व्यर्थमाजनि ।
किं तया चिन्तया जीव हन्ताहन्ताऽफला तव ॥ १॥

सुखमीशेच्छया नॄणां दुःखं चापि तदिच्छया ।
न स्वेच्छया भवेत्किञ्चिद्धन्ताहन्ताऽफला तव ॥ २॥

अदतो मदतोऽन्धस्य जिह्वां बह्वाशिनो नर ।
सन्तः खादन्ति दन्तास्ते हन्ताहन्ताऽफला तव ॥ ३॥

महत्वे ते यदाऽऽकाङ्क्षा महत्वेव भयं तदा ।
जीव किं जीवनार्थेऽतश्चिन्तया चिन्तयाऽच्युतम् ॥ ४॥

महापद्यागतायां हि महापद्यार्थिनोऽधुना ।
हरिणा स्वैरिणा त्राताः किं न खिन्नकृपालुना ॥ ५॥

ममता येषु ते नित्यममतास्तेऽत एव हि ।
अहन्ता यत्र ते जीव न हन्ता तस्य किं यमः ॥ ६॥

न स्वेषां स्वेच्छयाऽकार्षीत्कष्टं वाऽत्यक्रमीदिह ।
नरो वाऽप्यथवा नारी सुरो वाऽप्यसुरोऽपि वा ॥ ७॥

स्वेष्टानाप्त्या रोदनेन ग"रुद्रो अरुदद्" इति श्रुतिः ।
नर्ते त्वत्क्रियते किञ्चिदित्याहान्याच्युतं प्रभुम् ॥ ८॥

पार्थान्पार्थसतीमातां हरं भस्मासुरार्दितम् ।

विरोचनस्य पितरं कः कष्टात्प्राग्व्यमोचयत् ॥ ९ ॥

शत्रवो यान्ति मित्रत्वं मितेऽमित्रे सतां हरौ ।
मित्राण्येव च शत्रुत्वं शत्रौ शत्रौ सुरद्विषाम् ॥ १० ॥

पितुर्वधे पुत्र एव कारणं प्रागभूदिति ।
किं न श्रुतं सर्पवैरी सर्पस्यैवाभयङ्करः ॥ ११ ॥

दुःखास्पृष्टो हरिस्त्वेको दुःखस्पृष्टास्ततोऽपरे ।
अतो न भीतो दुःखेभ्यो भवानुभवधीरधीः ॥ १२ ॥

सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
इति यन्नियमस्तस्मान्नियमे नियमं कुरु ॥ १३ ॥

अतो दुरन्तया स्वान्तचिन्तया किं चिदन्तया ।
हयाननं दयासिन्धुं स्मर स्मरदभीष्टदम् ॥ १४ ॥

आचतुर्दशमाद्वर्षाद्या चिन्ता हृदि देहिनाम् ।
वादिराजो यतिस्तस्याः खण्डनायेदमभ्यधात् ॥ १५ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

चिन्ताखण्डनस्तोत्रं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु